## जनपदतदवध्योश्च । (१२४/१३४८)

वृद्धात् इत्येव, देशे इति च । तद्विशेषणं जनपदतदवधी । वृद्धाज् जनपदवाचिनः तदवधिवाचिनश्च प्रातिपदिकात् वुञ् प्रत्ययो भवति शैषिकः । छस्यापवादः । [1]आभिसारकः । [2]आदर्शकः । [3]जनपदावधेः खल्वपि– [4]औपुष्टकः । श्यामायनकः । तदवधेरपि जनपद एव गृह्यते न ग्रामः । किमर्थं तर्हि [5]ग्रहणम् ? बाधकबाधनार्थम् । गर्तोत्तरपदाच् छं बाधित्वा [6]वुञ् एव जनपदावधेर्भवति । त्रैगर्तकः ॥

## अवृद्धादपि बहुवचनविषयात् । (१२५/१३४९)

जनपदतदवध्योः इत्येव । अवृद्धाद् वृद्धाच्च [7]जनपदात् तदवधिवाचिनश्च बहुवचनविषयात् प्रातिपदिकाद् वुञ् प्रत्ययो भवति शैषिकः । अण्छयोरपवादः । अवृद्धाज्जनपदात् तावत् – अङ्गाः । वङ्गाः । [8]कलिङ्गाः । आङ्गकः । वाङ्गकः । कालिङ्गकः । [9]अवृद्धाज्जनपदावधेः – अजमीढाः । अजक्रन्दाः । आजमीढकः । आजक्रन्दकः । वृद्धाज्जनपदात् – दार्वाः । [10]जाम्बवाः । दार्वकः । [11]जाम्बवकः । वृद्धाज् जनपदावधेः – कालञ्जराः । वैकुलिशाः । [12]कालञ्जरकः । [13]वैकुलिशकः । विषयग्रहणमनन्यत्र भावार्थम् । जनपदैकशेष-बहुत्वे मा भूत् । वर्तन्यः । [14]वार्तनः । अपिग्रहणं किम् यावता वृद्धात पूर्वेणैव सिद्धम् ? तक्रकौण्डिन्यन्यायेन बाधा [15]मा विज्ञायि इति समुच्चीयते ॥

## कच्छाग्निवक्त्रगर्तोत्तरपदात् । (१२६/१३५०)

देशे इत्येव । उत्तरपदशब्दः प्रत्येकमभिसम्बध्यते । कच्छाद्युत्तरपदाद् देशवाचिनः प्रातिपदिकाच् च अवृद्धाद् वृद्धाच् च वुञ् प्रत्ययो भवति शैषिकः । छाणोरपवादः । [16]दारुकच्छकः । [17]पैप्पलीकच्छकः । [18]काण्डाग्नकः । वैभुजाग्नकः । ऐन्द्रवक्त्रकः । [19]सैन्धुवक्त्रकः । [20]बाहुगर्तकः । [21]चाक्रगर्तकः ॥

## धूमादिभ्यश्च । (१२७/१३५१)

[22]धूमादिभ्यो देशवाचिभ्यः प्रातिपदिकेभ्यः वुञ् प्रत्ययो भवति शैषिकः । [23]अणादेरपवादः । [24]धौमकः । खाण्डकः । पाथेयशब्दः पठ्यते, तस्य योपधात्वादेव वुञि सिद्धे सामर्थ्याददेशार्थं ग्रहणम् । तथा विदेहानर्तशब्दयोः जनपदलक्षणे वुञि सिद्धेऽदेशार्थः पाठः । विदेहानां क्षत्रियाणां स्वं वैदेहकम् । आनर्तकम् । समुद्रशब्दः पठ्यते, तस्य नावि मनुष्ये च वुञ् इष्यते । सामुद्रिका नौः । सामुद्रको मनुष्यः । अन्यत्र न भवति, सामुद्रं जलम् इति ।

धूम । [25]खण्ड । [26]शशादन । [27]आर्जुनाद । दाण्डायनस्थली । माहकस्थली । घोषस्थली । माषस्थली । राजस्थली । [28]राजगृह । सत्रासाह । भक्षास्थली । मद्रकूल । गर्तकूल । [29]आञ्जीकूल । द्व्याहाव । त्र्याहाव । संहीय । बर्बर । [30]वर्चगर्त । विदेह । आनर्त । माठर । [31]पाथेय । घोष । [32]शिष्य । मित्र । [33]बल । आराज्ञी । धार्तराज्ञी । अवयात । तीर्थ । 'कूलात् सौवीरेषु' (ग. सू. ९७) । 'समुद्रान्नावि मनुष्ये च' (ग. सू. ९८) । कुक्षि । अन्तरीप । द्वीप । [34]अरुण । उज्जयिनी । दक्षिणापथ । साकेत ॥

---

1. आभिचारकः फ. 2. आधिदर्शकः ह. 3. तदवध्योः ह. 4. औपपुष्टकः ब. 5. तदवधिग्रहणम् ड. फ. ह. 6. जनपदवुञेव यथा स्यात् क. फ. 7. जनपदवाचिनः क. फ. 8. नास्ति फ. ड. 9. अवृद्धाच्च ब. 10. काम्बवताः क. इ, याम्बाः ड, काम्बवाः ब. 11. काम्बवकः ब, जाम्बलकः ह, याम्बकः ड. 12. कलञ्जरकः ह. 13. वैजकुलिशः ड, वैकुलिशिकः ह. 14. वार्तनः नास्ति ह.ड. 15. मा भूत् इति क. 16. तारुकच्छकः क, भारुकच्छुकः ब. 17. पिप्पलीकच्छुकः ब, नास्ति फ. 18. खाण्डानकः ह, कौबरजानकः इत्यधिकम् ह. 19. गजेन्द्रवक्त्रकः फ. 20. बाहुकर्षकः क. 21. चाक्रकर्तकः क. 22. धूम इत्येवमादिभ्यः ब. 23. अणोऽपवादः क. 24. नास्ति क. 25. स्वेडा ब. 26. शशानस् ह. 27. आर्जुनायन ब. 28. विदेहराजगृह क. 29. आञ्जनकूल ह, आञ्जीकूप ब. 30. चर्वगर्त ब, वाचागर्त क. 31. सैर इत्यधिकम् ब. 32. शिष्टामित्र ब. 33. वल्ली ब, सुराज्ञी इत्यधिकम् ब. क. 34. अतरुण ब.